# Shri Bhuvaneshvari Panjara Stotram

# श्रीभुवनेश्वरी पञ्जर स्तोत्रम्

## Document Information

Text title : Bhuvaneshvari Panjarastotram

File name : bhuvaneshvarIpanjarastotram.itx

Category : devii, devI, dashamahAvidyA, panjara

Location : doc_devii

Proofread by : Ganesh Kandu kanduganesh at gmail.com, NA

Latest update : February 2, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# श्रीभुवनेश्वरी पञ्जर स्तोत्रम्

“पञ्जर” का अर्थ है पिञ्जरा । जिस प्रकार कोई पक्षी पिञ्जरे में बन्द कर दिया जाता है, तो उसे बिल्ली आदि हिंसक जीव हानि नहीं पहुँचा सकते और वह सुरक्षित रहता है । इसी प्रकार जो साधक अपने को श्री भुवनेश्वरी के मन्त्र से बने हुये इस पिञ्जरे में सुरक्षित रखता है, उसे कोई भी उसका शत्रु राजा से लेकर रङ्क तक कभी हानि नहीं पहूँचा सकता ।

इस स्तोत्र में चौदह दिशाओं में आगेपीछे, नीचेऊपर, दोनों बगल अर्थात् सब ओर से चौदह मन्त्रों  से भगवती भुवनेश्वरी से रक्षा करने की प्रार्थना की गयी है । इसका पाठकर्ता रण में, राजकुल में, द्यूत में तथा सर्वत्र विजयी होता है । इसके पाठ करनेवाले को कृत्या, रोग, पिशाच, भूतप्रेत कोई भी बाधा नहीं पहुँचा सकता ।

प्रातःकाल, मध्याह्न, सायंकाल तथा अर्धरात्रि में भगवती भुवनेश्वरी की पूजा कर जो इसका पाठ करता है, वह साधक मृत्यु को भी जीत लेता है । ब्रह्मास्त्र आदि कोई भी शस्त्र उसके शरीर पर नहीं चल सकता तथा इसका पाठ करनेवाला संसार में धनवान्, पुत्रपौत्रवान् और यशस्वी होकर अन्त में श्रीभुवनेश्वरीलोक को पहुँचता है ।

इस पञ्जर स्तोत्र को गुरुदेव और इष्टदेव पर श्रद्धा न रखनेवाले पुरुषों को कभी न बताना चाहिये । सिद्धि चाहनेवाला भक्त इस पञ्जर स्तोत्र को गुह्य रखे और भय के समय, होम के समय, विशेष कर पूजारम्भ के समय और दीपारम्भ के समय जो इसका पाठ करता है, उसकी सव कामनायें सिद्ध होती हैं और उसके कार्य निर्विघ्न समाप्त होते हैं । इस स्तोत्र के पाठ करनेवाले

को ज्वर, महामारी आदि कोई रोग पीडित नहीं करते और न उसे जल, पृथ्वी, बिजली, अग्नि, सर्प आर शत्रु आदि किसी से भय होता है ।

इस स्तोत्र के पाठ में प्रत्येक दिशा में रक्षा करने के लिये “भुवनेश्वरि” के बाद“योगविद्ये महामाये योगिनीगणसेविते” से लेकरत्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि तन्नः शक्तिः प्रचोदयातितना पाठ अवश्य पढना चाहिये, जैसा कि स्तोत्र में आगे दिया भी है । इस विशेषता पर ध्यान देने के लिये यहाँ उल्लेख किया गया है ।

यह स्तोत्र तीन सौ वर्षों से भी ऊपर का लिखा हुआ पुराने पत्रों में अव भी विद्यमान है । स्तोत्र के अन्त में लेखक ने लिखने का संवत् १७९८, मास, तिथि, पक्ष और दिन सब लिखे हैं । अपना नाम अनिरुद्ध भूसुर (ब्राह्मण) लिखा है । लिखनेवाला इसका नित्य पाठ करता था, अतः इस स्तोत्र का पाठ अवश्यमेव लाभदायक है क्योकि यह अनुभूत है ।

अथ पञ्जरस्तोत्रम् ।
इदं श्री भुवनेश्वर्याः पञ्जरं भुवि दुर्लभम् ।
येन संरक्षितो मर्त्यो वाणैः शस्त्रैर्न बाध्यते ॥ १॥

ज्वरमारीपशुव्याघ्रकृत्याचौराद्युपद्रवैः ।
नद्यम्बुधरणीविद्युत्कृशानुभुजगारिभिः ॥ २॥

सौभाग्यारोग्यसम्पत्तिकीर्तिकान्तियशोऽर्थदम् ॥ ३॥

ॐ क्रों श्रींह्रींऐं सौः पूर्वेऽधिष्ठाय मां पाहि चक्रिणि भुवनेश्वरि ।
योगविद्ये महामाये योगिनीगणसेविते ।
कृष्णवर्णे महद्भूते बृहत्कर्णे भयङ्करि ॥

देवदेवि! महादेवि! मम शत्रून् विनाशय ।
उत्तिष्ठ पुरुषे किं स्वपिषि भयं में समुपस्थितम् ॥

यदि शक्यमशक्यं तन्मे भगवति! शमय स्वाहा ।
त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि
तन्नः शक्तिः प्रचोदयात् ॥ १॥

ममाग्नेयां स्थिता पाहि गदिनीभुवनेश्वरि ।

योगविद्ये महामाये योगिनीगणसेविते ॥

कृष्णवर्णे महद्भूते लम्बकर्णे भयङ्करि ।
देवदेवि! महादेवि! मम शत्रुन् विनाशय ।
उत्तिष्ठ पुरुषे किं स्वपिषि भयं में समुपस्थितम् ।
यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥

त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि
तन्नः शक्तिः प्रचोदयात् ॥ २॥

याम्येऽधिष्ठाय मां पाहि शङ्खिनीभुवनेश्वरि ।
योगविद्ये महामाये योगिनीगणसेविते ॥

कृष्णवर्णे महद्भूते लम्बकर्णे भयङ्करि ।
देवदेवि! महादेवि! मम शत्रुन् विनाशय ।
उत्तिष्ठ पुरुषे किं स्वपिषि भयं में समुपस्थितम् ।
यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥

त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि
तन्नः शक्तिः प्रचोदयात् ॥ ३॥

नैर्ॠत्ये मां स्थिता पाहि खड्गिनीभुवनेश्वरि ।
योगविद्ये महामाये योगिनीगणसेविते ॥

कृष्णवर्णे महद्भूते लम्बकर्णे भयङ्करि ।
देवदेवि! महादेवि! मम शत्रुन् विनाशय ।
उत्तिष्ठ पुरुषे किं स्वपिषि भयं में समुपस्थितम् ।
यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥

त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि
तन्नः शक्तिः प्रचोदयात् ॥ ४॥

पश्चिमे मां स्थिता पाहि पाशिनीभुवनेश्वरि ।
योगविद्ये महामाये योगिनीगणसेविते ॥

कृष्णवर्णे महद्भूते लम्बकर्णे भयङ्करि ।
देवदेवि! महादेवि! मम शत्रुन् विनाशय ।
उत्तिष्ठ पुरुषे किं स्वपिषि भयं में समुपस्थितम् ।
यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥

त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि
तन्नः शक्तिः प्रचोदयात् ॥ ५॥

वायव्ये मां स्थिता पाहि शक्तिनीभुवनेश्वरि ।
योगविद्ये महामाये योगिनीगणसेविते ॥

कृष्णवर्णे महद्भूते लम्बकर्णे भयङ्करि ।
देवदेवि! महादेवि! मम शत्रुन् विनाशय ।
उत्तिष्ठ पुरुषे किं स्वपिषि भयं में समुपस्थितम् ।
यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥

त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि
तन्नः शक्तिः प्रचोदयात् ॥ ६॥

सौम्येऽधिष्ठाय मां पाहि चापिनीभुवनेश्वरि ।
योगविद्ये महामाये योगिनीगणसेविते ॥

कृष्णवर्णे महद्भूते लम्बकर्णे भयङ्करि ।
देवदेवि! महादेवि! मम शत्रुन् विनाशय ।
उत्तिष्ठ पुरुषे किं स्वपिषि भयं में समुपस्थितम् ।
यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥

त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि
तन्नः शक्तिः प्रचोदयात् ॥ ७॥

ईशेऽधिष्ठाय मां पाहि शूलिनीभुवनेश्वरि ।
योगविद्ये महामाये योगिनीगणसेविते ॥

कृष्णवर्णे महद्भूते लम्बकर्णे भयङ्करि ।
देवदेवि! महादेवि! मम शत्रुन् विनाशय ।
उत्तिष्ठ पुरुषे किं स्वपिषि भयं में समुपस्थितम् ।
यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥

त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि
तन्नः शक्तिः प्रचोदयात् ॥ ८॥

ऊर्ध्वेऽधिष्ठाय मां पाहि पद्मिनीभुवनेश्वरि ।
योगविद्ये महामाये योगिनीगणसेविते ॥

कृष्णवर्णे महद्भूते लम्बकर्णे भयङ्करि ।
देवदेवि! महादेवि! मम शत्रुन् विनाशय ।
उत्तिष्ठ पुरुषे किं स्वपिषि भयं में समुपस्थितम् ।
यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥

त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि
तन्नः शक्तिः प्रचोदयात् ॥ ९॥

अधस्तान्मां स्थिता पाहि वाणिनीभुवनेश्वरि ।
योगविद्ये महामाये योगिनीगणसेविते ॥

कृष्णवर्णे महद्भूते लम्बकर्णे भयङ्करि ।
देवदेवि! महादेवि! मम शत्रुन् विनाशय ।
उत्तिष्ठ पुरुषे किं स्वपिषि भयं में समुपस्थितम् ।
यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥

त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि
तन्नः शक्तिः प्रचोदयात् ॥ १०॥

अग्रतो मां सदा पाहि साङ्कुशे भुवनेश्वरि ।
योगविद्ये महामाये योगिनीगणसेविते
कृष्णवर्णे महद्भूते लम्बकर्णे भयङ्करि ।
देवदेवि! महादेवि! मम शत्रुन् विनाशय ।
उत्तिष्ठ पुरुषे किं स्वपिषि भयं में समुपस्थितम् ।
यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥

त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि
तन्नः शक्तिः प्रचोदयात् ॥ ११॥

पृष्ठतो मां स्थिता पाहि वरदे भुवनेश्वरि ।
योगविद्ये महामाये योगिनीगणसेविते ॥

कृष्णवर्णे महद्भूते लम्बकर्णे भयङ्करि ।
देवदेवि! महादेवि! मम शत्रुन् विनाशय ।
उत्तिष्ठ पुरुषे किं स्वपिषि भयं में समुपस्थितम् ।
यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥

त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि
तन्नः शक्तिः प्रचोदयात् ॥ १२॥

सर्वतो मां सदा पाहि सायुधे भुवनेश्वरि ।
योगविद्ये महामाये योगिनीगणसेविते ॥

कृष्णवर्णे महद्भूते लम्बकर्णे भयङ्करि ।
देवदेवि! महादेवि! मम शत्रुन् विनाशय ।
उत्तिष्ठ पुरुषे किं स्वपिषि भयं में समुपस्थितम् ।
यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥

त्रैलोक्यमोहिन्यै विद्महे विश्वजनन्यै धीमहि
तन्नः शक्तिः प्रचोदयात् ॥ १३॥

फलश्रुतिः

प्रोक्ता दिङ्मनवो देवि! चतुर्दश शुभप्रदाः ।
एतत् पञ्जरमाख्यातं सर्वरक्षाकरं नृणाम् ॥

गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति ।
न भक्ताय प्रदातव्यं नाशिष्याय कदाचन ॥

सिद्धिकामो महादेवि! गोपयेन्मातृजारवत् ।
भयकाले होमकाले पूजाकाले विशेषतः ॥

दीपस्यारम्भकाले वै यः कुर्यात् पञ्जरं सुधीः ।
सर्वान् कामानवाप्नोति प्रत्यूहैर्नाभिभूयते ॥

रणे राजकुले द्यूते सर्वत्र विजयी भवेत् ।
कृत्यारोगपिशाचाद्यैर्न कदाचित् प्रबाध्यते ॥

प्रातःकाले च मध्याह्ने सन्ध्यायामर्धरात्रके ।
यः कुर्यात् पञ्जरं मर्त्यो देवीं ध्यात्वा समाहितः ॥

कालमृत्युमपि प्राप्तं जयेदत्र न संशयः ।
ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रं न लगन्ति च ॥

पुत्रवान् धनवाँल्लोके यशस्वी जायते नरः ॥

इति श्रीभुवनेश्वरीपञ्जरस्तोत्रं सम्पूर्णम् ।

Proofread by Ganesh Kandu kanduganesh at gmail.com, NA

*Shri Bhuvaneshvari Panjara Stotram*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*